## राजदन्तादिषु परम् । (३१/९०२)

पूर्वनिपाते प्राप्ते परप्रयोगार्थं वचनम् । राजदन्तादिषु [1]उपसर्जनं परं प्रयोक्तव्यम । न केवलमुपसर्जनस्य, अन्यस्यापि [2]यथालक्षणं विहितस्य पूर्वनिपातस्या[3]यमपवादः परनिपातो विधीयते । दन्तानां राजा राजदन्तः । वनस्य अग्रे [4]अग्रेवणम् । निपातनादलुक् ।

राजदन्तः । [5]अग्रेवणम् । लिप्तवासितम् । नग्नमुषितम् । [6]सिक्तसंमृष्टम् । [7]मृष्टलुञ्चितम् । [8]अवक्लिन्नपक्वम् । [9]अर्पितोप्तम् । उप्तगाढम् । पूर्वकालस्य परनिपातः ।

उलूखलमुसलम् । तण्डुलकिण्वम् । दृषदुपलम् । [10]आरग्वायनबन्धकी । चित्ररथबाह्लीकम् । [11]आवन्त्यश्मकम् । [12]शूद्रार्यम् । स्नातकराजानौ । विष्वक्सेनार्जुनौ । अक्षिभ्रुवम् । दारगवम् ।

शब्दार्थौ । [13]धर्मार्थौ । कामार्थौ । अनियमश्चात्रेष्यते । अर्थशब्दौ । अर्थधर्मौ । अर्थकामौ[14] । तत् कथम् ? वक्तव्यमिदम् धर्मादिषु उभयम् इति ।

[15]वैकारिमतम् । [16]गजवाजम् । [17]गोपालधानीपूलासम् । पूलासककरण्डम् । स्थूलपूलासम् । उशीरबीजम् । सिञ्जास्थम् । चित्रास्वाती । भार्यापती । जायापती । जम्पती । दम्पती । जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते । पुत्रपती । पुत्रपशू । केशश्मश्रू । श्मश्रुकेशौ । शिरोबीजम् । सर्पिर्मधुनी । मधुसर्पिषी । आद्यन्तौ । अन्तादी । गुणवृद्धी । वृद्धिगुणौ[18] ॥

## द्वन्द्वे घि । (३२/९०३)

पूर्वम् इति वर्तते । द्वन्द्वे समासे घ्यन्तं (१.४.७/२४३) पूर्वं प्रयोक्तव्यम् । [19]पटुगुप्तौ । मृदुगुप्तौ । [20]अनेकप्राप्तावेकस्य नियमः, शेषे त्वनियमः । पटुमृदुशुक्लाः । पटुशुक्लमृदवः । द्वन्द्वे इति किम् ? विस्पष्टपटुः ॥

## अजाद्यदन्तम् । (३३/९०४)

द्वन्द्वे इति वर्तते[21] । अजाद्यदन्तं[22] शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम् । [23]उष्ट्रखरम् । [24]उष्ट्रशशकम् ।

[१०५] बहुष्वनियमः । (म. भा. १. ४३६)

[25]अश्वरथेन्द्राः । इन्द्ररथाश्वाः ।

[१०६] द्वन्द्वे घ्यजाद्यदन्तं[26] विप्रतिषेधेन । (म. भा. १. ४३८)

[27]इन्द्राग्नी । इन्द्रवायू । तपरकरणं किम् ? [28]अश्वावृषौ, वृषाश्वे [30]इति वा ॥

---

1. परं उपसर्जनं ब. क. 2. घ्यादेः इत्यधिकम् क. इ. 3. अपवादः नास्ति ब. क. फ. 4–5. अग्रेवनम् इ. 6. सिक्तसंसृष्टम् ब. इ. 7. मृष्टलुचितम् फ, भृष्टलुञ्चितम् इ, भृष्टरुचितं क, हृष्टमुदितं ह. 8. अप° इ. 9. अर्पितोदम् इ. 10. आरदायनिबन्धकी ब, आरग्वायनचाटन्धकी फ. 11. अवन्त्यश्मकम् ब. इ. क, अधरोष्ठं इत्यधिकम् क. 12. शूद्राचार्यम् ह. 13. नास्ति क. इ. फ. 14. चन्द्रार्कौ, अर्कचन्द्रौ इत्यधिकम् क. 15. वैयाकरणमतम् क. ड, वैकारिकमतम् फ. 16. गोजाविजम् फ. 17. गोपालीधानीपूलासम् फ. इ. 18. भीष्मद्रोणौ, द्रोणभीष्मौ, चन्द्रादित्यौ, आदित्यचन्द्रौ, चन्द्रराहू, राहुचन्द्रौ, ग्रीष्मवसन्तौ, वसन्तग्रीष्मौ, शुक्रशुची, शुचिशुक्रौ, करभरासभौ, रासभकरभौ इत्यधिकम् क. ड. 19. पटुपुत्रौ फ. 20. द्वन्द्वे समासे सर्वोपसर्जनत्वात् पूर्वनिपातो न प्राप्नोति, पर्यायेण वा प्राप्ते नियमार्थं वचनम् इत्यधिकम् ड. 21. पूर्वमिति च इत्यधिकम् क. इ. 22. च इत्यधिकम् फ. 23. नास्ति ब. क इ. 24. उष्ट्रशशम् ब. क. ड. इ. 25. अश्वेन्द्राः फ. 26. रूपं इत्यधिकम् क. 27. नास्ति फ. 28. अश्ववृषौ, वृषाश्वौ इ. 29. इति वा नास्ति फ, वा नास्ति ग.